# B.K. BIRLA CENTRE FOR EDUCATION

SARALA BIRLA GROUP OF SCHOOLS
A CBSE DAY-CUM-BOYS' RESIDENTIAL SCHOOL

**PRE-BOARD-3 EXAMINATION (2025-26)**
**SANSKRIT (119)**

Class : X
Date :09.01.2026
Admission No.:

**SET – B**

Duration: 3 Hrs
Max. Marks: 80
Roll No.:

---

सामान्यनिर्देशाः -

1. कृपया सम्यकतया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
2. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

| | | |
|---|---|---|
| 'क' खण्डः | अपठितावबोधनम् | 10 अङ्काः |
| 'ख' खण्डः | रचनात्मक कार्यम् | 15 अङ्काः |
| 'ग' खण्डः | अनुप्रयुक्तव्याकरणम् | 25 अङ्काः |
| 'घ' खण्डः | पठितावबोधनम् | 30 अङ्काः |

3. प्रत्येक खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
4. उत्तरलेखनात् पूर्व प्रश्नस्य क्रमाङ्कः अवश्य लेखनीयः।
5. प्रश्नस्य कमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।
6. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीमानि।
7. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

---

'क' भागः (अपठित्तावबोधनम् 10 अङ्काः)

प्रश्न 1. अधोलिखितम् गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत

अंतर्राष्ट्रियोगदिवसः प्रतिवर्ष जूनमासस्य एकविंशतितमे दिनाङ्के सम्पूर्ण विश्वे उत्साहपूर्वकं आचर्यते। संयुक्तराष्ट्रसंघे २०१४ तमे वर्षे भारतप्रधानमन्त्रिणा योगस्य वैश्विकमहत्त्वे प्रतिपादितम्। ततः २०१५ तमे वर्षे "अन्तर्राष्ट्रीययोगदिवसः" प्रथमवारं आचरितः। अस्य माध्यमेन योगः स्वास्थ्यसंरक्षणस्य, रोगनिवारणस्य, मानसिकसन्तुलनस्य च वैश्विकोपायः अभवत्। योगः भारतस्य प्राचीनतमः आध्यात्मिकः शारीरिकः च अभ्यासः, यः शरीरमनसोः समन्वयं स्थापयति। अंतर्राष्ट्रियोगदिवसस्य प्रमुखोद्देश्यं योगस्य शारीरिक-मानसिक-आध्यात्मिककलानो प्रचारः प्रसारश्च, यः प्राचीनभारते उद्भुतः अस्ति ।

अस्मिन् दिवसे विश्वस्य विभिन्नदेशेषु सहस्रशः जनाः योगाभ्यास कुर्वन्ति। विद्यालयेषु, महाविद्यालयेषु, कार्यालयेषु, सार्वजनिकस्थानेषु च योगशिबिराणि आयोज्यन्ते। यत्र यमः, नियमः, आसनम्, प्राणायामः, प्रत्याहारः, धारणा, ध्यानम्, समाधिः इत्येते योगस्य अष्टाङ्गानि सर्वेषां कृते प्रदर्श्यन्ते शिक्ष्यन्ते च। एतेषु प्रत्येक अङ्ग साधकस्य जीवने अनुशासिते, स्वास्थ्यसम्पन्ने, संतुलिते च करोति। योगः न केवले शारीरिकस्वास्थ्यं, अपितु मानसिक शान्ति, एकाग्रती, आत्मविश्वासे च वर्धयति। आधुनिकायासपूर्णजीवनशैल्या योगः एक रामबाणौषधम्। सर्वे जनाः योगाभ्यासेन लाभान्विताः भवितुम् अर्हन्ति। अन्ताराष्ट्रियोगदिवसः विविधतायी एकतायाः, प्राचीनपरम्परायाः च प्रतीकः अस्ति। योगेन सर्वत्र शान्तिः स्वास्थ्ये च प्रसारयितुं शक्यते। अतः योगः जीवनस्य सर्वाङ्गिणविकासाय आवश्यकः, मानवकल्याणाय अनुपमः च मार्गः इति निःसन्देहं कथयितुं शक्यते।

अ. एकपदेन उत्तरत (केवले प्रश्नद्वयम्) 2x1=2

(i) अंतर्राष्ट्रिययोगदिवसः प्रथमवारं कदा आचरितः ?
(ii) योगस्य कति अङ्गानि सन्ति ?
(iii) योगशिबिराणि कुत्र आयोज्यन्ते ?

आ. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) 2x2=4

(i) योगः कथं वैश्विकोपायः अभवत् ?
(ii) अन्ताराष्ट्रिययोगदिवसस्य प्रमुखोद्देश्यं किं वर्तते ?
(iii) प्रधानमन्त्रिणा योगस्य वैश्विकमहत्त्वं कुत्र कदा च प्रतिपादितम् ?

इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत | 1x1=1

ई. यथानिर्देशम् उत्तरत - 3x1=3

(i) 'सर्वे जनाः योगाभ्यासेन लाभान्विताः भवितुम् अर्हन्ति'। अस्मिन् वाक्ये क्रियापदं किम्?

(क) जनाः (ख) भवितुम्
(ग) अर्हन्ति (घ) सर्वे

(ii) 'सकले' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ?

(क) दिनाङ्के (ख) सम्पूर्णे
(ग) समन्वयम् (घ) विश्वे

(iii) 'जनाः' इति पदस्य किं विशेषणपदं गद्यांशे प्रयुक्तम् ?

(क) एकतायाः (ख) प्रत्याहारः
(ग) सहस्रशः (घ) एकाग्रताम्

'ख' भागः (रचनात्मकं कार्यम् - 15 अङ्काः)

प्रश्न 2. भवान् रविः अस्ति दिल्लीनगरे वसति। नियमितदिनचर्यायाः महत्त्वं वोधयितुं अनुजाय लिखितम् इदं पत्रं मञ्जूषायां प्रदत्तपदानां सहायतया पूरयित्वा पुनः लिखत। 10x1/2=5

छात्रावासः
(i)---------

दिनाङ्कः-

प्रिय अनुजा
सप्रेम (ii)---------


अत्र (iii)----------- तत्रास्तु। गतसप्ताहे भवतः अव्यवस्थितदिनचर्या दृष्टा अहं चिन्तितः अस्मि। अतः अद्य अहं भवते नियमितदिनचर्यायाः (iv) —--------- स्पष्टीकरोमि। प्रातः (v) —--------- पूर्वम् उत्तिष्ठ। मुखप्रक्षालने कृत्वा शुद्धजले पिच। ततः योगाभ्यासे कुरु। प्राणायामः, सूर्यनमस्कारः च अत्यावश्यकौ। स्नानानन्तरं द्वित्राः होराः (vi)---------- समर्पय। प्रातःकालीनम् अध्ययनं सर्वाधिकं (vii) —-------- भवति। विद्यालयात् आगत्य विश्रामं कृत्वा पुनः अध्ययनं कुरु। सायंकाले किञ्चित् क्रीडां अपि क्रीडतु, तेन शारीरिकं मानसिकं च (viii) —------------ वर्धते। रात्रौ अष्टवादने भोजनं समाप्य नववादने शयनं कुरु। एवं यदि त्वं दिनचर्याम् (ix)---------- पालयिष्यसि, तर्हि तव जीवनं व्यवस्थितं, स्वास्थ्ययुक्तं, सफलं च भविष्यति। मातृपितृचरणेषु मम प्रणामाः निवेदय।

भवतः अग्रजः,
(x) —-----------

मञ्जूषा

सूर्योदयात्, फलदायकम्, कुशलम्, रविः, अनुशासनेन, अध्ययनाय, नमोनमः, महत्त्वम्, दिल्लीतः, स्वास्थ्यम्

प्रश्न 3.अ प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत - 5x1=5



मञ्जूषा

वृक्षारोपणम्, पुरुषस्य, पर्यावरणम्, बालिका, शुद्धम्, कर्त्तव्यम्, स्वहस्तेन, प्राणवायुम्, पर्यावरणरक्षा, हस्ते, सूर्योदयः, महिला।

अथवा

(आ) मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत -

"अध्ययनस्य महत्त्वम्"

मंजूषा

धनम्, सर्वत्र, विदुषाम्, सम्मानम्, विद्यया, भवति, शब्दकोशः, पराजितः, अर्जयितुम्, च, सन्ति, अपि।

प्रश्न 4. अ मञ्जूषाप्रदत्तपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितसंवादं पुनः लिखत- 5x1=5

सुरेशः - नमस्ते, अरुण! किं भवान् इदानीं व्यस्तः अस्ति?

अरुणः - नमस्ते। नैव, (i) —-----------

सुरेशः - श्वः विद्यालये संस्कृत-प्रतियोगिता अस्ति। किं भवान् तदर्थं सज्जः अस्ति?

अरुणः - (ii) –-----------

सुरेशः - निश्चयेन। आवां सायं पञ्चवादने उद्याने मिलावः।

अरुणः - उत्तमः विचारः। (iii) –---------

सुरेशः - सम्प्रति, किं भवान् पुस्तकं पठति?

अरुणः - (iv) —-----------

सुरेशः - नमस्ते अहम् अपि तत् एव पुस्तकं अनुसरामि। प्रतियोगितायै शुभकामनाः!

अरुणः - (v)

मञ्जूषा

* आम्, अहं सज्जः अस्मि। किं भवान् मया सह अभ्यासं करिष्यति ?
* आम्, 'सरलसंस्कृतम्' इति पुस्तकं पठामि।
* धन्यवादः । भवते अपि शुभकामनाः।
* किं कार्यम् ?

* तत्र एव संस्कृत-वार्तालापस्य अभ्यासं कुर्वः ।

अथवा

(आ) मञ्जूषायाः सहायतया अधोलिखितां कथां पूरयित्वा पुनः लिखत-

प्राचीनकाले एकः राजा आसीत्। सः सर्ववस्तूनि प्राप्य अपि (i) —---------- आसीत्। एकदा सः मन्त्रिणं पृष्टवान् "कं सुखं प्राप्नुयाम्?" मन्त्री उवाच "महाराज! यः स्वजीवनेन (ii) —-------- सः एव सुखी। परं राजा तु असन्तुष्टः एव आसीत्। सः नगरे घोषणां कारयितवान् यः मां सुखिनं कर्तुं शक्नोति, तस्मै महत् (iii) —-------- दास्यामि। बहवः जनाः आगतवन्तः, किन्तु राजा सुखी न अभवत्। अन्ततः एकः (iv) —------- साधुः आगतवान्। सः राजानम् उक्तवान्- 'प्रतिदिनं एकं एतादृशं कार्यं कुरु येन (v) —----------- हितं भवेत्। राजा आश्चर्यचकितः अभवत्, किन्तु तथैव अकरोत्। प्रथमे दिवसे राजा एकं दरिद्रं बालकं दृष्ट्वा तस्मै शिक्षणव्ययम् दत्तवान्। द्वितीयदिवसे सः एकां वृद्धां महिलां दृष्ट्वा तस्याः गृहं संशोधयितुं (vi)----------- प्रेषितवान्। तृतीयदिवस एकं (vii) —--------- दृष्ट्वा तस्य चिकित्सां कारितयान्। एवं राजा प्रतिदिनं एकं (viii) —--------- स्वयमेव प्रसरः अभवत्। सः ज्ञातवान् यत् सुखं वस्तुभ्यः न प्राप्यते, अपितु (ix) —--------- प्राप्यते। अन्ते राजा साधूम् आहूय तत्कृतज्ञतां प्रकटयित्वा उवाच भगवन्! इदानीं मया ज्ञातं यत् परोपकारं एव परमं (x) —-------- स्वार्थात् न, परार्थात् एव सुख प्राप्यते।" पूर्वं राजा करोति स्म कानिचित् दिनानि व्यतीतानि, राजा जीवनस्य वास्तविकं सुखं प्राप्य सर्वेषां कल्याणाय राज्यं प्रशासितवान्।

मञ्जूषा- धनं, सेवकान्, परोपकारं, दुःखी, सेवाभावात्, रोगिणे, सन्तुष्टः, सुखम्, परेषां , वृद्धः

'ग' भागः अनुप्रयुक्तव्याकरणम् 25 अङ्काः

प्रश्न 5. (अ) अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत- 4x1-4

(i) तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः ।

(ii) आज्ञा गुरुणा हि+अविचारणीया ।

(iii) धैर्यं लयसमर्थं च षडेते पाठका गुणाः।

(iv) कार्यक्रमः + तु सुनिश्चितः ।

अथवा

(आ) अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत-

(i) जीवाः सर्वेऽत्र मोदन्तो भावयन्तः परस्परम्।

(ii) नैतदस्त्र मनुष्येषु तैः प्रयुक्तम् कथम् + चन् ।

(iii) अथ अर्जुन उवाच।

(iv) लोके चक्षुः + दानं दुष्करमेव।

प्रश्न 6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत -4x 1=4

(i) अवक्रता यथा चित्ते तथा वाचि भवेद् यदि।

(क) अनवक्रताः (ख) न वक्रतायाः

(ग) न वक्रता (घ) अन वक्रता

(ii) ततः युधिष्ठिरः च अर्जुनः च श्रीकृष्णेन सह रथारोहणं नाटयतः।

(क) युधिष्ठिरार्जुने (ख) युधिष्ठिरार्जुनौ

(ग) युधिष्ठिरार्जुनाभ्याम् (घ) युधिष्ठिरार्जुनयोः

(iii) नास्ति रागसमं दुःखम् ।

(क) रागेण समम्		(ख) रागे समम्
(ग) रागस्य समम्		(घ) रागाय समम्

(iv) सः पश्चातापेन दग्धमानसः सर्व वृत्तान्ते निवेद्य <u>करुणया सहितम्</u> उच्चैः अक्रन्दत् ।
(क) सकरुणः		(ख) सहकरुणम्
(ग) सकरुणा		(घ) सकरुणम्

प्रश्न 7. अधोलिखितवाक्येषु रेताङ्कित्तपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत - 4x1-4

(1) जगत्पतेः एषा सृष्टिः <u>रम् + अनीयर्</u> ।
(क) रमणीयः		(ख) रमणीयम्
(ग) रमणीया		(घ) रमनीया

(ii) एतेषाम् दर्शनाय <u>सम्पूर्णा</u> व्यवस्था वर्तते।
(क) सम्पूर्ण + टाप्		(ख) सम्पूर्ण + तल्
(ग) सम्पूर्ण + ठक्		(घ) सम्पूर्ण + ङीप्

(iii) राज्ञः <u>दानशील + तल्</u> आकर्ण्य देशान्तरेभ्योऽपि जनाः ते देशम् आयान्ति स्म।
(क) दानशीलता		(ख) दानशीलताम्
(ग) दानशीलम्		(घ) दानशीलत्वम्

(iv) अस्मिन् लोके विद्वांसः एवं <u>चक्षुष्मन्तः</u> प्रकीर्तिताः।
(क) चक्षुष् + वतुप्		(ख) चक्षुष् +ङीप्
(ग) चक्षुष् + तल्		(घ) चक्षुष् + मतुप्

प्रश्न 8. (अ) वाच्यानुसारं मञ्जूषायाः उचितपदैः रिक्तस्थानानि पूरयित्वा संवादं पुनः लिखत – 3x1-3

राधा - सीते! त्वं किं (i) —------ ?
सीता - राधे। मया गीतं स्मर्यते ।
राधा - त्वं किमर्थ (ii) —----------- स्मरसि ?
सीता - यतोहि श्वः गायनप्रतियोगिता अस्ति। त्वया अधुना किं क्रियते ?
राधा - (iii) —---------- लेखः लिख्यते ।
मञ्जूषा - मया, करोषि, गीतम्

अथवा

(आ) वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा वाक्यानि पुनः लिखत -
(i) शिशुः मात्रा सह —------- (गम्)
(ii) बालिकया —---------(श्लोक) पठ्यन्ते।
(iii) —------- (अर्जुन) अभ्यासः क्रियते।

प्रश्न 9. कालबोधकशब्दैः अधोलिखित दिनचर्या पूरयत- 3x1=3

(i) माता प्रातः —---------- (6:15) वादने पूजां करोति।
(ii) तदनन्तरं सर्वाणि कार्याणि समाप्य —-------- (9:45) वादने कार्यालयं गच्छति ।
(iii) सार्य ——---- (5:30) वादने गृहं प्रत्यागच्छति।

प्रश्न 10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पुरयत - 4x1=4

(i) ----------- इदं चित्रं पश्यत।
(ii) एषः कलहः —-------- भवतां विनाशकारकं भविष्यति।
(iii) आम् तस्य निग्रहम् वायोः —-------- दुष्करम् मन्ये।
(iv) अहं यदि तव सन्ततिं न पालयामि —-------- कुत्र स्युः पिकाः ?

मञ्जूषा - इव, तर्हि, अधुना, नूनम्

प्रश्न 11 अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत - 3x1=3

(i) ज्वालमालाकुलाः अश्वाः प्राणत्राणाय इतस्ततः <u>अधावत्।</u>

(क) अधावम् (ख) अधावत
(ग) अधावन् (घ) अधावः

(ii) बौद्धभिक्षुणां <u>निवासयोग्यः</u> स्थली इयम् ।

(क) निवासयोग्यम् (ख) निवासयोग्या
(ग) निवासयोग्य (घ) निवासयोग्याः

(iii) <u>त्वम्</u> एव अत्र वृष्टेः अभिनन्दनं करोमि ।

(क) सः (ख) यूयम्
(ग) वयम् (घ) अहम्

'घ' भागः - पठितावबोधनम् (30 अङ्काः)

प्रश्न 12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -

अनेन वचसा प्रतिहतान्तःकरणः प्रच्छत्रभाग्यः अचिन्तयत्-किम् इदं वचनं विशेषेण माम् एव लक्ष्यीकरोति ? अहो! कुमार्गम् आश्रितस्य मम कीदृशी इयं क्लेशपरम्परा। गुरूपदेशेन इव अनेन बालवचसा मम चक्षुषी समुन्मीलिते। अद्य आरभ्य पापपथं त्यजामि इति विचिन्त्य मित्र दुष्टबुद्धिम् अवदत् 'सखे! यदि मां मित्रस्थाने परिगणयसि, तर्हि साधुजनगर्हितम् इमं पन्थानं त्यजतु भवान् । दुष्टबुद्धिः तु तस्य सद्वचनानि तिरस्कृत्य ग्रामाभिमुखं प्राचलत् । प्रच्छन्नभाग्यः तु समुपजातविवेकः स्वगृहं प्रतिनिवृत्तः। गृहे तस्य भार्या सपदि समागतं पतिं दृष्ट्वा अपृच्छत्-आर्य! किं सर्वगतं कुशलं वर्तते ? अयथाकाले समागतोऽसि? सम्प्रति धर्ममतिः सः पश्चात्तापेन दग्धमानसः सर्वं वृत्तान्तं निवेद्य सकरुणम् उच्चैः अक्रन्दत् । बुद्धिमती ताम् अवदत् अलं चिन्तया। आपदां तरणिः धैर्यम्। इदानीं विषादं त्यक्त्वा उद्यमः क्रियताम्।

I. एकपदेन उत्तरत (केवले प्रश्नद्वयम्) 2x1/2=1

(i) बालवचसा कस्य चक्षुषी समुन्मीलिते?
(ii) प्रच्छनभाग्यः कीदृशं पथं त्यजति ?
(iii) दुष्टबुद्धिः सद्वचनानि तिरस्कृत्य कुत्र प्राचलत् ?

II. पूर्णवाक्येन उत्तरत (केवले प्रश्नद्वयम्) 2x1-2

(i) सा बुद्धिमती स्वपतिं किम् अवदत् ?
(ii) प्रच्छन्नभाग्यः सर्वं वृत्तान्तं निवेद्य किम् अकरोत् ?
(iii) प्रच्छन्नभाग्यः स्वमित्रं किम् अवदत् ?

III. (अ) निर्देशानुसारम् उत्तरत - 2x1-2

(i) 'साधुजनगर्हितम् इमे पन्थानं त्यजतु भवान् ।' अत्र किम् कर्तृपदम् अस्ति?
(ii) 'अद्य आरभ्य पापपथम त्यजामि' अत्र क्रियापदं किम् ?

अथवा

(आ) निर्देशानुसारम् उत्तरत -

(i) 'अधुना' इत्यस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्?

(ii) 'वृत्तान्तम्' इत्यस्य विशेषणपदं गद्यांशात् चित्वा लिखत ।

प्रश्न 13. अधोलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -

अर्जुन उवाच - चञ्चलं हि मनः कृष्ण! प्रमाथि बलवद्दृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्॥

श्रीभगवानुवाच - असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते॥

1. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) 2x1/2=1

(i) "चञ्चलं हि मनः कृष्ण!" इति कः वदति ?

(ii) किं बलवद्दृढम् अस्ति ?

(iii) कस्य निग्रहं दुष्करम् ?

II. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) 2x1=2

(i) मनसः निग्रहं कथम् अस्ति ?

(ii) अर्जुनः मनसः विषये किं कथयति ?

(iii) मनः केन गृह्यते ?

III. (अ) निर्देशानुसारम् उत्तरत - 2x1=2

(i) "अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते।" अत्र वाक्ये क्रियापदं किम्?

(ii) 'कठिनम्' इत्यस्य किं समानार्थक पदं प्रयुक्तम्?

अथवा

(आ) निर्देशानुसारम् उत्तरत-

(i) 'सुकरम्' इत्यस्य किं विलोमपदं श्लोके प्रयुक्तम्?

(ii) चञ्चलं इत्यस्य विशेष्यपदं श्लोकात् चित्वा लिखत ।

प्रश्न 14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -

अश्वत्थामा - रे दुष्ट भीम ! त्वम् अद्य वध्योऽसि मया। (विलोक्य) अये कथं श्रीकृष्णार्जुनौ युधिष्ठिरश्च ? (स्वगतम्) इदानीं किं करवाणि? आः दृष्टम्, अस्मिन् विषमे समये ब्रह्मास्त्रम् एव मे शरणम्। मोचयामि अस्त्रम्। (ध्यानं नाटयति ब्रवीति च) इदम् अपाण्डवाय ।

श्रीकृष्णः - पार्थ पश्य, पश्य। एतद् विमुच्यते ब्रह्मास्त्र द्रोणपुत्रेण! त्रैलोक्ये दहन् इव प्रचण्डज्वालः अग्निः परितः प्रसरति । अर्जुन! अर्जुन। त्वमपि मुञ्च ब्रह्मास्त्र एतत् निवारयितुम्।'

अर्जुनः - नमः भगवते। स्वस्ति आचार्यपुत्राय, स्वस्ति मे भ्रातृभ्यः । उत्सृज्यते मया ब्रह्मास्त्रम्। अस्त्रम् अस्त्रेण शाम्यताम् ।

(ततः प्रविशतः व्यासनारदौ)

नारदः - (व्यासं प्रति) पश्यतु भवान्। कोऽयम् अनर्थः क्रियते एताभ्यां वीराभ्याम्। समन्तात् वर्धमानाः प्रचण्डानलशिखाः आकाशं लिहन्ति इव। गगनात् सहस्त्रशः उल्काः भूमौ पतन्ति। कम्पते खलु सपर्वत-वन-दुमा सकला मही। पवनः स्तब्धः जातः । सहस्त्रांशुः न भासते। शैलाः विदीर्यन्ते। कथमपि एतौ निवारणीयौ, अन्यथा सकलं जगद् ध्वस्तं भविष्यति ।

1. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 2x1/2=1

(i) काः आकाशं लिहन्ति इव ?
(ii) श्रीकृष्णः कं सम्बोधयति ?
(iii) काभ्याम् अनर्थः क्रियते ?

II. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) 2x1=2

(i) अर्जुनः किमर्थं ब्रह्मास्त्रं विमुञ्चति ?
(ii) कीदृशः अग्निः प्रसरति ?
(iii) अश्वत्थामा किम् उक्त्वा ब्रह्मास्त्रं विमुञ्चति

III. (अ) निर्देशानुसारम् उत्तरत - 2x1=2

(i) 'सहस्त्रशः उल्काः' इत्यनयोः पदयोः विशेष्यपदं चित्वा लिखत ।
(ii) 'मोचयामि' इति क्रियापदस्य कर्तृपदं किम् अत्र युक्तम्?

अथवा

(आ) निर्देशानुसारम् उत्तरत-

(i) 'सूर्यः' इत्यस्य किं पर्यायपदम् अत्र प्रयुक्तम् ?
(ii) 'अन्यथा सकलं जगद् ध्वस्तं भविष्यति' अस्मिन् वाक्ये क्रियापदं किम्?

प्रश्न 15. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत । 5x1=5

(i) सः परेभ्यः <u>अहितं कर्म</u> न कुर्यात् ।
(ii) <u>नेपथ्ये</u> काकध्वनिः श्रूयते ।
(iii) राजा <u>वैद्यान्</u> आहूय अश्वरक्षार्थम् अपृच्छत् ।
(iv) वयम् <u>ऐतिहासिकस्थलानां</u> विषये ज्ञातुम् इच्छामः।
(v) सत्यसमं <u>तपः</u> नास्ति।

प्रश्न 16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखित श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत । 4x1/2=2

अ अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति !
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात् ॥

अन्वयः- (i)----------- ! तव अयम् (ii)--------- कः अपि अपूर्वः विद्यते। व्ययतः (iii)----------
आयाति (iv) ---------- च क्षयम् आयाति ।
मञ्जूषा - कोशः, सञ्चयात्, भारति, वृद्धिम्

अथवा

(आ) मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थ रिक्तस्थानानि पूरयित्वा पुनः लिखत-

यः इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च ।
न कुर्यादहिते कर्म स परेभ्यः कदापि च ॥

भावार्थः - यः जनः अस्मिन् (i)----------- स्वकल्याणम् अनेकानि (ii)------------ च वाञ्छति
सः जनः कदापि अन्येभ्यः (iii)------------- अकल्याणकरं (iv)------------- न कुर्यात् ।
मञ्जूषा -सुखानि, कार्यं, संसारे, जनेभ्यः

प्रश्न 17. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थ चित्वा लिखत- 4 x1=4

( i ) तेन तम् <u>आशु</u> ताडयन्ति स्म।

(क) चिरम् (ख) तत्परम्
(ग) परम् (घ) शीघ्रम्

(ii) "का का" इति ध्वनिना सुप्तान् <u>प्रबोधयामि।</u>

(क) जागरयामि
(ख) अवगच्छामि
(ग) स्वापयामि
(घ) स्थापयामि

(iii) पुष्पाणां समृद्धिः <u>सुगन्धिः</u> च मनोहरः।
(क) सम्पत्तिः
(ख) सर्वत्र
(ग) सुरभिः
(घ) रम्यम्

(iv) शिष्यः <u>स्वमेधया</u> पादम् आदत्ते।
(क) अनुभवैन
(ख) निजबुद्ध्या
(ग) आत्मना
(घ) सहपाठिभिः

प्रश्न 18. मञ्जूषायाः पदसहायतया रिक्तस्थानानि पूरयित्वा कथाम् उत्तरपुस्तिकायां लिखत- 8x1/2=4

एकदा भगवान् बोधिसत्वः (i)---------
पुण्यफलैः शिवीनां (ii)------------- अभवत् । स बाल्यकालात् एव वृद्धोपसेवी (iii) —---------- शास्त्रपारङ्गतः च आसीत्। जनानां कल्याणकर्मसु संलग्नः सः (iv)----------- प्रजाः अपालयत्। करुणा-उदारता दानशीलतादि (v)----------- सः नगरं परितः धन-धान्यसमृद्धाः (vi)---------- अकारयत्। तत्र याचकानाम् (vii)--------- अन्न-पेय-वस्त्र-रजत-सुवर्णादिकानि इच्छितानि (viii)---------------- प्राप्य सन्तुष्टः अभवत् । नृपस्य दानशीलतां श्रुत्वा देशान्तरेभ्यः अपि याचकाः याचनार्थं तम् देशम् आगच्छन् ।

मञ्जूषा - दानशालाः, वस्तूनि, पुत्रवत्, बहुजन्मार्जित, विनयशीलः, राजा, सद्गुणयुक्तः, समूहः

====================== सफलतायै शुभाषया: ======================